# Hymn in praise of Goddess Tripurasundari in 36 verses

# ષટ્ત્રિંશન્નવમલ્લિકાસ્તવઃ

## Document Information

Text title : ShaTtri.nshanavamallikaastotra

File name : navamallika36.itx

Category : devii, dashamahAvidyA, stotra, tyAgarAja, devI

Location : doc_devii

Author : tyAgarAja

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Description-comments : Hymn in praise of the Devi as Tripurasundari

Latest update : March 22, 2002, June 26, 2011

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# ષટ્ત્રિંશન્નવમલ્લિકાસ્તવઃ

યા માતા સદસદ્વિલક્ષણપરાસંવિત્સ્વરૂપા સદા
    જાગ્રત્સ્વપ્નસુષુપ્તિવૃત્તિવિલસત્સ્ફૂર્તિઃ પરા વૈખરી ।
ઇચ્છાદિત્રયધર્મિણી પરગુહાહન્તાપ્રકાશાત્મિકા
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧॥

યાં મૂલામ્બુજકર્ણિકાપ્રવિલસત્કામાખ્યપીઠે પરાં
    સોમાર્કાનલદીપ્તિમક્ષરતનું બાલાં વિમર્શાત્મિકામ્ ।
ધ્યાયન્તઃ સહસા ભજન્તિ કવિતાપાણ્ડિત્યમત્યદ્ભુતં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨॥

યામમ્ભોજમૃણાલતન્તુસુતનું વિદ્યુત્સહસ્રપ્રભાં
    કૂજન્તીં કુલકુણ્ડખેલનપરાં પ્રાણાનિલોદ્યોજનીમ્ ।
ઓડ્યાણે પરિચિન્તયન્તિ કૃતિનઃ પીયૂષવર્ષાપ્તયે
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩॥

યાં સ્મૃત્વા મણિપૂરકે રવિનિભે રૌદ્રે કૃશાન્વાલયે
    પશ્યન્તીં પદવાક્યપદ્યરચનાપાણ્ડિત્યસંવર્ધિનીમ્ ।
વક્ત્રામ્ભોરુહસૌધનર્તનનટીં પશ્યન્તિ શૈવાઃ સદા
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૪॥

યાં ધ્યાયન્તિ વિધૂતપાપહૃદયા હૃત્પુણ્ડરીકામ્બરે
    નિર્દોષારુણરત્નદીપતુલિતાં પ્રજ્ઞાનસીમન્તિનીમ્ ।
સંલબ્ધું સકલાત્મિકાં પરમનઃકાયપ્રવેશાક્રિયાં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૫॥

યાં જાલન્ધરબન્ધનોર્ધ્વગમનાં ચક્રે વિશુદ્ધૌ શર-
    જ્જ્યોત્સ્નાકાશનિભે સ્વરાક્ષરલસદ્વ્યષ્ટાબ્જપત્રાન્વિતે ।
ધ્યાયન્ત્યાત્મસુખાનુભૂતિમમલાં લબ્ધું ચિરઞ્જીવિતાં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૬॥

યાં પશ્યન્તિ પુરાણપુણ્યલસિકાઃ શ્રીદેશિકાજ્ઞાધરા
    ભ્રૂમધ્યદ્વિદલામ્બુજપ્રવિલસચ્ચાન્દ્રીકલાં શાશ્વતીમ્ ।
નિત્યાનન્દસુધાસમુદ્રલહરીક્રીડાનુભૂત્યૈ સદા
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૭॥

યાં પાર્શ્વસ્થિતહંસવર્ણવિલસદ્બિન્દૌ ત્રિવર્ણાત્મિકાં
    પ્રદ્યુમ્નીયકલામયીં નિજસુખોદ્બોધપ્રસાદોદયામ્ ।
સિદ્ધાન્તાર્થરતા જિતેન્દ્રિયકણા ધ્યાયન્ત્યભેદાય વૈ
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૮॥

યામર્ધેન્દુસરોરુહેઽર્ધશશભૃદ્રૂપે હિમાંશુપ્રભે
    પશ્યન્ત્યાત્મસુખાય વિસ્વનમયીં તત્તન્ત્રસઙ્ખ્યાલવૈઃ ।
હૃલ્લેખામનુપારગા નિયમિતપ્રાણાદિસર્વેન્દ્રિયાઃ
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૯॥

રોધિન્યમ્બુરુહે ત્રિકોણરુચિરે જ્યોત્સ્નાનિભે સર્વદા
    દ્વાત્રિંશલ્લવમાનનિસ્વનવહાં પશ્યન્તિ યાં ખેચરીમ્ ।
માયાક્રીડનપેશલાનિજપદાનન્દાપ્તયેઽપ્યદ્ભુતં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૦॥

નાદાબ્જે વરપદ્મરાગમણિયષ્ટ્યા સ્પર્ધમાનાં પરાં
    ગચ્છન્તીં શિવધામ ષોડશલવધ્યાનાત્મિકાં સંવિદા ।
તારાનાયકભાનુસઙ્ગરસિકાઃ પશ્યન્તિ મુદ્રાન્વિતાઃ
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૧॥

નાદાન્તેઽષ્ટલવધ્વનિપ્રકટિતાં વિદ્યુચ્છટાભાસુરાં
    યાં સવ્યસ્થિતબિન્દુલાઙ્ગલમિવા સ્વં રૂપમાબિભ્રતીમ્ ।
યાન્તીમૂર્ધ્વકુલં યમાદિનિરતાઃ પશ્યન્ત્યખણ્ડાપ્તયે
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૨॥

તિર્યગ્બિન્દુયુગસ્ય વામવિચરદ્રેખામયે નિર્મલે
    શક્ત્યબ્જે તરુણાર્કરોચિષિ ચ યાં પશ્યન્તિ લક્ષેક્ષણાઃ ।
સ્વાનન્દાય ચતુર્લવસ્વનમયીં શ્રીપાદુકાગામિનીં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૩॥

બિન્દ્વાશ્લિષ્ટકૃશાનુકોણતનુમત્યાં વ્યાપિકાયાં સદા

બાલોષ્ણાંશુરુચૌ પરાં લવયુગધ્યાનાત્મિકાં સંવિદમ્ ।
યાં પશ્યન્તિ મનીષિણઃ કુલવધૂપાદાબ્જરેણૂદ્વહાઃ
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૪॥

ઊર્ધ્વાધોવિલસત્સુબિન્દુયુતરેખામ્ભોરુહે નિર્મલે
સૂર્યાભે સમનેતિનામ્નિ લવનિસ્વાનાત્મિકાં ચેતનામ્ ।
યાં પશ્યન્ત્યમનસ્કયોગવિભવાયાન્તર્મુખારાધકાઃ
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૫॥

ઉન્મન્યમ્બુરુહે દ્વિષડદિનમણિજ્યોતિર્મયે ચિન્મયીં
બિન્દ્વાધારસમુલ્લસત્સરલસદ્રેખામયે યોગિનઃ ।
યાં પશ્યન્ત્યણિમાદિવિઘ્નદલને ધીધૈર્યવિજ્ઞાનિનઃ
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૬॥

યાં ધાત્રાદિવિહીનધામરસિકાં જ્ઞાત્રાદિવિશ્રાન્તિકામ્
આત્મારામપરાયણશ્રુતિશિરોમૌનાર્થરૂપાં શિવામ્ ।
નિર્દ્વન્દ્વાત્મપરાયણા અનુભવન્ત્યાનન્દસીમાતિગાઃ
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૭॥

યામાબાલબુધાજ્ઞગોપવિદિતાહંરૂપિણીં સર્વદા
સર્વોપપ્લવમુક્તધામરમણીં સ્વાનન્દલીલાવતીમ્ ।
નિસ્ત્રૈગુણ્યપરાપરેતરરસાઃ સ્વેનૈવ પશ્યન્ત્યહો
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૮॥

યાં પ્રજ્ઞેતિ વદન્તિ કેચિદિતરે સદ્રૂપિણીત્યાદિમાં
શૂન્યં કેચિદજેતિ કેચિદપરે જાડ્યાત્મિકેત્યદ્ભુતમ્ ।
જાડ્યાજાડ્યમયીતિ કેચિદિતરે તદ્બ્રહ્મ સર્વાત્મકં
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૧૯॥

યા કાષ્ઠા પરમા ગતિઃ પરમભૂદસ્પન્દિની સ્પન્દિની
સૃષ્ટ્યાદૌ નિખિલં ચરાચરમિદં સ્વસ્મિન્ પ્રવેશ્યેચ્છયા ।
ક્રીડત્યેકરસાત્મિકાપિ બહુધા ભાતીવ યા સર્વગા
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૦॥

યાહમ્પ્રત્યયસાક્ષિણી જગદુપાદાનં ચ નિષ્કારણં
યાવસ્થાત્રયવર્જિતાપિ સકલાવસ્થાત્મિકા સંવિદા ।
યા ભોક્તૃત્વવિલક્ષણાપિ સતતં ભોક્ત્રી પ્રમોદાન્નિજાત્

તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૧॥

સર્વાનુગ્રહધર્મિણી સ્વયમભૂત્ સાદાખ્યધર્મેણ યા
લોકાનાં પરમેશ્વરી કિલ તિરોધાનેન ધર્મેણ યા ।
યા નાશસ્થિતિસૃષ્ટિધર્મવિભવૈ રુદ્રાદિમૂર્ત્યાત્મિકા
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૨॥

યા સોમાર્કમહીજલાગ્નિમરુદાકાશાત્મદેહૈઃ સદા
સર્વં વિશ્વમિદં દધત્યાપિ પરં નિર્દેહલેપાદ્ભુતમ્ ।
યા વેદાગમશાસ્ત્રમૂલગુરુરપ્યવ્યાજમૌનાત્મિકા
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૩॥

સૂક્ષ્માત્ સૂક્ષ્મતમા વિભોર્વિભુતમા યા મધ્યમા સર્વદા
શ્રોત્રાદેઃ શ્રવણાદિરાત્મનિ ચિદાભાસો મતૌ પ્રેરિકા ।
વિશ્વો જાગ્રતિ તૈજસઃ પરમભૂત્ સ્વપ્ને સુષુપ્તૌ સુખં
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૪॥

નિર્દોષા સકલાન્તરઙ્ગરમણીયાપ્યદ્ભુતં નિષ્ક્રિયા
યા સર્વેન્દ્રિયકર્મકર્ત્ર્યપિ સતાં પાશાષ્ટકચ્છેદિની ।
નિર્લોભા નિખિલપ્રપઞ્ચમમતાહન્તાત્મિકાપ્યદ્વયી
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૫॥

અધ્વાતીતચરિત્રવત્યપિ સતાં સન્માર્ગસન્દર્શિની
યા પૂજાવિમુખી નૃણાં નિજપદાર્ચાયાં નિયન્ત્રી પરમ્ ।
સર્વાહઙ્કૃતિરૂપિણી નતજનાહઙ્કારવિચ્છેદિની
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૬॥

યા પઞ્ચાનનમઞ્ચમધ્યવિલસત્કામેશ્વરાઙ્કસ્થિતા
નિત્યા પૂજિતપાદપદ્મયુગલા નિત્યોત્સવાહ્લાદિની ।
સર્વાનન્દગૃહોજ્જ્વલા ગુરુકૃપાપીયૂષદૃગ્ગોચરા
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૭॥

નૈષ્કર્મ્યા સ્વયમપ્યહો નિજકૃપાપાત્રસ્ય યત્ સઞ્ચિતં
પ્રારબ્ધમ્ ક્ષપયત્યનન્યગતિકં તં ચાકરોદ્દેવતામ્ ।
નિર્ધર્મિણ્યપિ સર્વદા નિજનતાયાનન્દદાયિન્યહો
તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૮॥

યા બ્રહ્માણ્ડજગત્પ્રસૂરપિ સદા તારુણ્યવત્યદ્ભુતં
    સર્વૈશ્વર્યરતાપિ ગર્વમદમાત્સર્યાદિહીના પરમ્ ।
ત્રૈલોક્યેશ્વરરાજ્ઞ્યપિ શ્રિતજનૈર્દત્તં પ્રગૃહ્ણાત્યહો
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૨૯॥

યા ભક્તોત્તમચેતસશ્ચપલતાં હન્ત્રી કુરઙ્ગેક્ષણા
    ચિત્રં કામરિપોર્મનશ્ચપલતાં દાત્રી સ્વરૂપેણ ચ ।
મોહં હન્તિ નતસ્ય મન્દહસિતૈર્મોહં વિધત્તે વિભોઃ
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૦॥

યસ્યાઃ પદ્મદલાયતાક્ષિકરુણાપાત્રાણિ વાણ્યાદય-
    સ્તત્તત્કાર્યપરા ભવન્તિ કૃતિનો બ્રહ્મેન્દ્રરુદ્રાદયઃ ।
યસ્યાઃ પાદસરોજસેવનપરા નન્દન્ત્યહો સિદ્ધયઃ
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૧॥

દિવ્યશ્રીચરણારવિન્દવિગલત્પીયૂષસર્પિઃ પ્લુતં
    જ્ઞાનાગ્નૌ સુમનઃસ્રુચા જડમિદં દૃશ્યં તપઃસંસ્કૃતમ્ ।
યસ્યૈ ભક્તિસતીસમન્વિતબુધા જુહ્વત્યજસ્રં પરં
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૨॥

યા શૃઙ્ગારરસોપદેશનગુરુઃ શ્રીકામજેતુઃ સદા
    કારુણ્યામૃતવૃષ્ટિપૂર્ણજલમુક્ શ્રીનીલકણ્ઠપ્રિયા ।
પઞ્ચેષોર્વિજયશ્રિયો ધ્વજપટી યા શાન્તિસીમાનટી
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૩॥

વિદ્યોદ્યાનમરાલિકા પરશિવોત્સઙ્ગોલ્લસચ્છારિકા
    મેનાપુણ્યસુપઞ્જરાશ્રિતશુકી કાત્યાતની યામ્બિકા ।
શ્રીપાણ્ડ્યેશ્વરકીર્તિકલ્પલતિકા કાઞ્ચીપુરીનાયિકા
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૪॥

લોકાનાં પરમૌષધં ભગવદધ્વંસાય વિદ્યાપ્તયે
    મૂકાનામમૃતાબ્ધિવીચિકવિતાપાણ્ડિત્યસીમાપ્તયે ।
નિસ્ત્રૈગુણ્યપરાત્પરસ્ય મદનોદ્રેકાય ચિત્રં ચ યા
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૫॥

નિત્યૈશ્વર્યવતી મહાગુણવતી સત્પુત્રસમ્પદ્વતી
    સત્સૌભાગ્યવતી પતિપ્રિયવતી પ્રાજ્ઞેશ્વરી પાર્વતી ।

સત્સૌન્દર્યવતી શિવવ્રતવતી સાધ્વી ચ યા શાશ્વતી
    તાં નૌમિ ત્રિપુરાં પરાપરમયીં સ્વાનન્દસંવિત્તયે ॥ ૩૬॥

ષટ્ત્રિંશન્નવમલ્લિકાસ્રજમિમાં ત્યાગેશપાદાર્પિતાં
    પ્રજ્ઞાસૂત્રસુગુમ્ભિતાં ગુરુકૃપાનન્દામૃતાપ્લાવિતામ્ ।
યો ધત્તે હૃદિ મૂર્ધ્નિ નિશ્ચલધિયા શ્રોત્રેણ વાચાથવા
    તસ્મૈ દાસ્યતિ દેવતા શિવપદં સત્પુત્રસમ્પત્સુખમ્ ॥ ૩૭॥

ઇત્યાનન્દનાથપાદપદ્મોપજીવિના કાશ્યપગોત્રોત્પન્નેનાન્ધ્રેણ
ત્યાગરાજનામ્ના વિરચિતઃ ષટ્ત્રિંશન્નવમલ્લિકાસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

---

*Hymn in praise of Goddess Tripurasundari in 36 verses*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*